प्रथमः पाठः

# मङ्गलम्

[ उपनिषदः वैदिकवाङ्मयस्य अन्तिमे भागे दर्शनशास्त्रस्य सिद्धान्तान् प्रकटयन्ति। सर्वत्र परमपुरुषस्य परमात्मनः महिमा प्रधानतया गीयते। तेन परमात्मना जगत् व्याप्तमनुशासितं चास्ति। स एव सर्वेषां तपसां परमं लक्ष्यम्। अस्मिन् पाठे परमात्मपरा उपनिषदां पद्यात्मकाः पञ्च मन्त्राः संकलिताः सन्ति। ]

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥ ( ईशावास्य० 15 )

अणोरणीयान् महतो महीयान्
आत्मास्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः॥ ( कठ० 1.2.20 )

सत्यमेव जयते नानृतं
सत्येन पन्था विततो देवयानः।
येनाक्रमन्त्यृषयो ह्याप्तकामा
यत्र तत् सत्यस्य परं निधानम्॥ ( मुण्डक० 3.1.6 )

यथा नद्यः स्यन्दमानाः समुद्रे-
ऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद् विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्॥ ( मुण्डक० 3.2.8 )

PATNA

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति
नान्यः पन्था विद्यतेऽयनाय॥ (श्वेताश्वतर० 3.8)

## अन्वयाः

हे पूषन् ! सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितं (वर्तते), तत् सत्यधर्माय (मह्यं) दृष्टये अपावृणु ॥1॥

जन्तोः गुहायां निहितः (अयम्) आत्मा अणोः अणीयान्, महतः महीयान् (च वर्तते) अक्रतुः धातुप्रसादात् आत्मनः तम् महिमानं पश्यति, वीतशोकः (च भवति)। सत्यम् एव जयते अनृतं न (जयते) ॥ 2 ॥

सत्येन (एव) देवयानः पन्थाः विततः (वर्तते), येन हि आप्तकामाः ऋषयः (तत् सत्यं) आक्रमन्ति यत्र सत्यस्य तत्परं निधानम् (अस्ति) ॥ 3 ॥

यथा नद्यः स्यन्दमानाः (सत्यः) नामरूपे विहाय समुद्रे अस्तं गच्छन्ति तथा (एव) विद्वान् नामरूपाद् विमुक्तः सन् (तं) दिव्यम् परात्परं पुरुषम् उपैति ॥4॥

अहं तमसः परस्तात् आदित्यवर्णम् एतं महान्तं पुरुषं वेद। तम् एव विदित्वा मृत्युम् अत्येति (एतस्मात् पृथग्) अन्यः पन्थाः अयनाय न विद्यते ॥5॥

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| हिरण्मयेन | – | स्वर्णमयेन, ज्योतिर्मयेन | – | सोने-सा, ज्योतिर्मय |
| पात्रेण | – | आवरणेन | – | पात्र से, आवरण से |
| सत्यस्य | – | ऋतस्य | – | सत्य का |
| अपिहितम् | – | आच्छादितम् | – | ढका हुआ |
| मुखम् | – | आस्यम्, द्वारम् | – | मुख, द्वार |
| अपावृणु | – | अपसारय | – | हटा दें |
| सत्यधर्माय | – | सत्यधर्मवते | – | सत्यधर्मवान् के लिए |
| दृष्टये | – | उपलब्धये | – | प्राप्ति के लिए |
| अणोः | – | सूक्ष्मात् | – | अणु से, सूक्ष्म से |

| | | | | |
|---|---|---|---|---|
| अणीयान् | – | सूक्ष्मतरः | – | सूक्ष्म, अणु |
| महतः | – | बृहतः | – | महान से |
| महीयान् | – | महत्तरः | – | महान् |
| जन्तोः | – | प्राणिनः | – | प्राणी के |
| गुहायाम् | – | हृदि | – | हृदय रूपी गुफा में |
| वीतशोकः | – | शोकरहितः | – | शोक रहित |
| पन्थाः | – | मार्गः | – | मार्ग, रास्ता |
| विततः | – | विस्तीर्णः | – | विस्तार होता है |
| स्यन्दमानाः | – | प्रवहन्त्यः | – | प्रवाहित होती हुए, जाती हुई |
| अनृतम् | – | असत्यम् | – | मिथ्या, झूठ |
| अत्येति | – | पारंगच्छति | – | पार कर जाता है। |

## व्याकरणम्

**सन्धिविच्छेदः**

| | | | |
|---|---|---|---|
| (क) | सत्यस्यापिहितम् | – | सत्यस्य + अपिहितम् (अ + अ) दीर्घ |
| | पूषन्नपावृणु | – | पूषन् + अपावृणु (न् + अ) व्यंजन |
| | जन्तोर्निहितः | – | जन्तोः + निहितः (ः + न्) विसर्ग |
| | प्रसादान्महिमानमात्मनः | – | प्रसादात् + महिमानमात्मनः व्यंजन |
| | नानृतं | – | न + अनृतं (अ + अ) दीर्घ |
| | येनाक्रमन्त्यृषयो | – | येन + आक्रमन्ति + ऋषयः (अ+आ, दीर्घ, इ+ऋ, यण्) |
| | ह्याप्तकामा | – | हि + आप्तकामा (इ+आ) यण् |
| | पुरुषमुपैति | – | पुरुषम् + उप + एति, अ+ए = ऐ, वृद्धि |

## अभ्यासः
## ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**
   (क) हिरण्मयेन पात्रेण कस्य मुखम् अपिहितम् ?
   (ख) सत्यधर्माय प्राप्तये किम् अपावृणु ?

(ग) ब्रह्मणः मुखं केन आच्छादितमस्ति ?

(घ) महतो महीयान् कः ?

(ङ) अणोः अणीयान् कः ?

(च) पृथिव्यादेः महत्परिमाणयुक्तात् पदार्थात् महत्तरः कः ?

(छ) कीदृशः पुरुषः निजेन्द्रियप्रसादात् आत्मनः महिमानं पश्यति शोकरहितश्च भवति ?

(ज) किं जयं प्राप्नोति ?

(झ) किं जयं न प्राप्नोति ?

(ञ) काः नाम रूपञ्च विहाय समुद्रे अस्तं गच्छन्ति ?

2. एतेषाम् पद्यानाम् प्रथम चरणं मौखिकरूपेण पूरयत -

(क) हिरण्मयेन ..............।

(ख) अणोरणीयान् ..............।

(ग) सत्यमेव जयते ..............।

(घ) यथा नद्यः ..............।

(ङ) वेदाहमेतं ..............।

3. एतेषां पदानाम् अर्थं वदत -

अपिहितम्, सत्यधर्माय, अणोरणीयान्, अक्रतुः, वीतशोकः, विततः, देवयानः, आप्तकामाः, स्यन्दमानाः, अयनाय।

4. स्वस्मृत्या काञ्चित् संस्कृतप्रार्थनां श्रावयत।

## अभ्यासः

## ( लिखितः )

1. एकपदेन उत्तरं लिखत -

(क) सत्यस्य मुखं केन पात्रेण अपिहितम् अस्ति ?

(ख) पूषा कस्मै सत्यस्य मुखम् अपावृणुयात् ?

(ग) कः महतो महीयान् अस्ति ?

(घ) किं जयते ?

(ङ) देवयान: पन्था: केन वितत: अस्ति ?

(च) नद्य: के विहाय समुद्रे अस्तं गच्छन्ति ?

(छ) साधक: पुरुषं विदित्वा कम् अत्येति ?

2. अधोलिखितम् उदाहरणम् अनुसृत्य प्रदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -

यथा -

प्रश्न : सत्यस्य मुखं केन अपिहितम् अस्ति ?

उत्तरं : सत्यस्य मुखं हिरण्मयेन पात्रेण अपिहितम् अस्ति।

(क) कस्य गुहायाम् अणो: अणीयान् आत्मा निहित: अस्ति ?

(ख) विद्वान् कस्मात् विमुक्तो भूत्वा परात्परं पुरुषम् उपैति ?

(ग) आप्तकामा ऋषय: केन पथा सत्यं प्राप्नुवन्ति ?

(घ) विद्वान् कीदृशं पुरुषं वेत्ति ?

3. सन्धि-विच्छेदं कुरुत -

(क) कस्यापिहितम्

(ख) अणोरणीयान्

(ग) जन्तोर्निहित:

(घ) ह्याप्तकामा:

(ङ) उपैति।

ABSOL SOLUTIONS PATNA

4. प्रकृति-प्रत्ययनिदर्शनं कुरुत -

(क) अपिहितम्

(ख) निहित:

(ग) विमुक्त:

(घ) विहाय

(ङ) वितत:

5. समास-विग्रहं कुरुत -

(क) अनृतम्

(ख) आदित्यवर्णम्

(ग) वीतशोकः

(घ) देवयानः

(ङ) नान्यः

## 6. रिक्तस्थानानि पूरयत -

(क) ...................................... सत्यस्यापिहितं मुखम्।

(ख) ...................................... महतो महीयान्।

(ग) ...................................... नानृतम्।

(घ) यथा ...................................... स्यन्दमानाः समुद्रे।

(ङ) तमेव ...................................... मृत्युमेति।

## 7. अधोनिर्दिष्टानां पदानां स्ववाक्येषु प्रयोगं कुरुत -

(क) सत्यम्

(ख) सत्यस्य

(ग) गच्छन्ति,

(घ) विमुक्तः

(ङ) अन्यः।

## योग्यताविस्तारः

अनेन पाठेन सर्वशक्तिमतः सर्वव्यापकस्य सर्वाधारस्य सार्वकालिकस्य सत्यस्वरूपस्य च ईश्वरस्य वन्दनं कृतमस्ति।

'उपनिषद्' इति शब्दः उप + नि पूर्वकात् विशरण- गति- अवसादनार्थकात् षद्लृ धातोः क्विप् प्रत्यये कृते निष्पद्यते। अस्य शब्दस्य व्युत्पत्तिमूलकः अर्थः अस्ति-या विद्या संसारबीजस्य अविद्यादेः विशरणं = विदारणं कृत्वा ब्रह्म प्रति गमयति फलतः सर्वाणि पापानि अवसादितानि शिथिलानि नष्टानि करोति सा 'उपनिषद्'। अथवा उप = गुरुम् उपगम्य निषद् = उपविश्य शान्तचित्तः सन् गुरुमुखात् यद् अविद्यानाशकं पापमोचकं ब्रह्मसाक्षात्कारकं रहस्यं श्रूयते तत् शास्त्रम् उपनिषद् इति कथ्यते।

प्रतिवेदं प्रतिशाखम् उपनिषदः उपलब्धाः आसन्। किन्तु अधुना तथा तासाम्प्राप्तिः नास्ति। आदिशंकराचार्येण ईशादिदशोपनिषदां भाष्याणि लिखितानि सन्ति। उपनिषद् एव वेदान्तदर्शनस्य आधारः।

उपनिषत्सु आदर्शजीवनशैली उपनिबद्धा वर्तते। तदैव निरपेक्षभावेन विना फलाकांक्षया कर्त्तव्यकर्मणः सम्पादनं सांसारिकवस्तुषु अनासक्तिः सत्यस्य धर्मस्य आत्मनः परमात्मनः ईशसत्तायाश्च तत्त्वान्वेषणं सुखे-दुःखे, जये-पराजये, लाभे-हानौ अन्यविषमदशायाञ्च एकरसतादिविषयाः उपनिषत्सु प्रतिपादिताः सन्ति।

श्रीमद्भगवद्गीता उपनिषदां सारभूता वर्तते।

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥**

प्रायः उपनिषदाम् आदौ अन्ते च शान्तिपाठः प्रदत्तः दृश्यते। तत्र प्रमुखः शान्तिपाठः अत्र लिख्यते

(1) ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

(2) ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

वैदिकमन्त्राणां सस्वरवाचनस्य प्रशिक्षणं करणीयम्।

□